लोपो व्यक्ता दिति लोपः अप्रतुता

मस्जेरंत्यात्पूर्वो नुम्वाच्यः ... ॥२

र्षीत्। विश प्रवेशने। विशति। वेष्टा। अविक्षत्। मृश आमर्षणे। अम्राक्षीत्। अमार्क्षीत्। अमृक्षत्। रि पि गतौ। नु धातोः। रियति। पियति। रेता। पेता। धि धारणे॥ क्षि निवासगत्योः॥ षू प्रेरणे। सुवति। कॄ विक्षेपे। ऋत इद्। किरति। चकरतुः। ऋच्छत्यॄतां संयोगादेः र्गुणः। चकरुः। वॄतो वेति वा दीर्घः। करिता। करीता। उपात् किरतेः सुडागमः। हिंसायां प्रतेश्च॥ उपस्किरति। हिंसायां प्रतिस्किरति। रुजो भंगे। अरौक्षीत्। अरौक्तां। भुजो कौटिल्ये। भोक्ता। अभौक्षीत्। छुप स्पर्शे। छोप्ता। अच्छौप्सीत्। रुश रिश हिंसायां। रोष्टा। अरुक्षत्। अरोक्षीत्। रेष्टा। अरिक्षत्। लिश गतौ। लेष्टा। अलिक्षत्। खिद परिघाते। खिंदति। खेत्ता। अखैत्सीत्। पिश अवयवे। पिंशति। पेशिता। अपिक्षत्॥ इति तिं॥ ॥ जुषी प्रीतिसेवनयोः। जुषते। ओविजी भयचलनयोः। उद्विजते। विज इडादिप्रत्ययो ङित्। उद्विजिता। ओलजी ओलस्जी व्रीडे। लजे। ललज्जे॥ ष्टङ् व्यायामे॥ अयं पकि। ऋतो रिङ् नवत्यकारेप्रत्यये यकि च। नु

(Interlinear glosses: सर्व; पियति; क्षियति; सुविन्; रमति; मुचादेरिति मुम; सेट्; सेट्; पर; विस्तार; अनिट्; लज्जी)

(Left margin:) छ्रा ५

प्रायेणायं न्सर्वैः तु विजीतितौ दाधिकरौ धादिकयोः हयोर्प्र हलं न तु जौहौ सादे ह स्यत्या व्याख्यानात् ॥२॥

(Right margin:) ॥ कृवस्य शोतिनाक्षिः कृ आदीनां मितिनारः १=

अपेसीत् २

अरद्दिल्व व्यवधानेपि सुट् कात्पूर्वं इति वक्तव्यं उपस्किरत उपर स्कार ॥४॥

अयं दीपनार्थे पिल्ल इत्यपाणिनि पिंशतु दीपयति त्वथेः ४=

उद्विजिष्यते उदविजि षत उदविजिष्ट २

अकारस्य दीर्घत्वं तेन ए
त्व पूर्व लोपो न।

सि॰ चं॰ नु॰

विनिमयः परिवर्तः

३४

आरद्रियेआद्रतीआ
द्रियते

नित्यत्वादंतरंगत्वा
च्च आतोलोपः
त्वत् प्रातत्स्यालोपः
क्रीणते॥६॥

धातोः। व्याध्रियते। व्यापप्रे। व्यापरिष्यते। व्यापृत। व्यापृषातां। मृङ् प्राणत्यागे। म्रियते। लुङ्लिङोश्चतुर्षु चात्मनेपदं अन्यत्र। म्रियते। ममार। ममर्थ। मृषीष्ट। अमृत। दृङ् आदरे। आद्रियते। आदद्रे। आद्रिषीष्ट। आदृत। धृङ् अवस्थाने। ध्रियते॥ इति तुदादयः॥ ॥ डुक्रीञ् द्रव्यविनिमये। नाक्र्यादेः कर्तरि चतुर्षु। क्रीणाति। ई हसे। नाऽत्यस्याकारस्य ई त् ङिति हसे। क्रीणीतः। नातः। नाऽत्यस्याकारस्य लोपो ङिति स्वरे। क्रीणंति। क्रीणीते। चिक्रयिथ। चिक्रेथ। अक्रैषीत्। अक्रेष्ट। प्रीञ् तर्पणे कान्तौ च। प्रीणीयात्। पिप्रिये। श्रीञ् पाके। अश्रैषीत्। मीञ् हिंसायां। मीनाति। मिनोति दीङां मित्यात्वं। ममौ णोरितियः। ममौ। मिम्यतुः। ममिथ। ममाथ। मासीष्ट। माता। अमासीत्। स्कुञ् आप्रवणे। स्तंभु स्तुंभु स्कंभु स्कुंभु स्कुञ्भ्यो नुर्ना च। स्कुनोति। स्कुनुते। स्कुनुतः। स्कुनाति। अस्कुनात्। चुस्कुविथ। अस्कौषीत्। अस्कोष्ट। स्तंभु स्तुंभु स्कंभु स्कुंभु रोधने। एते पंचातः। विष्टभ्नोति। विष्टभ्नाति। स्तुभ्नाति। स्तुभ्नोति। विष्कभ्नाति। विष्कुभ्नाति

पावयते पचते परस्मैप
दिनस्त्यर्थः।

अयं क्रीतिरिड् लुघा
तोः॥२॥

क्रीणाति क्रीणीते क्री
णात क्रीणीत क्रीणातु
क्रीणीतां अक्रीणात्
अक्रीणीत चिक्राय
चिक्रिये क्रीयात् क्रे
षीष्ट क्रेता क्रेता क्रे
ष्यति क्रेष्यते अक्रैषी
त् अक्रेष्यत् अक्रेषी
त् अक्रेष्ट ४

तर्पणं तृप्तिः कान्तिः का
मनाई

तङ्कुरतां

एते चत्वारः सौत्राः प
रस्मैपदिनः॥२॥

३४

॥स्तृसंयोगादेरृत इति गुणः॥ स्तृतस्तरिष्टोर्लिङ्सिचोरिति दीर्घः॥ सीरादेः अचोऽनिट इति नदीर्घः॥ स्तृदंतात्सिचोर्लिङ्सिचौ नाविति गुण॥ स्तृतस्तरि इति स्तरीष्ट दीर्घः॥ वृ ऋत इति वेटो दीर्घः स्तरिता स्तरीता यसेट नदीर्घः अस्तारिष्ट॥५॥६॥

स्कुभ्नोति। स्कुभ्नाति। हसांतात्नाहलस्थाने आनः स्याद्धौपरे। स्तंभान।
स्तुभान। स्कभान। स्कुभान। अस्तभत्। अस्तंभीत्। युञ् बंधने। युनाति। योता। क्नूञ्
शब्दे। क्नूनाति। अक्नावीत्। द्रूञ् हिंसायां। द्रूविता। पूञ् पवने। प्वादीनां ह्रस्वः॥ कर्तरि च
लुङ्। पुनाति। अपावीत्। लूञ् छेदने। लुनाति। स्तॄञ् आच्छादने। स्तृणाति। तस्तरतुः। स्तीर्
यात्। स्तरिषीष्ट। स्तीर्षीष्ट। अस्तारीत्। अस्तरिष्ट। अस्तरीष्ट। अस्तीर्ष्ट। कृञ् हिंसायां।
कृणाति। चकार। चकरतुः। चकरे। वृञ् वरणे। वृणाति। वूर्यात्। वरिषीष्ट। वूर्षीष्ट॥
अवरिष्ट। अवरीष्ट। अवूर्ष्ट॥ धूञ् कंपने। धुनाति। दुधविथ। दुधोह। धोता। धवि
ता। अधावीत्। अधविष्ट। अधोष्ट। ग्रह उपादाने। गृह्णाति। गृहाण। ग्रहीषीष्ट।
ग्रहिता। अग्रहीत्। अग्रहीष्ट॥ इत्यात्मने॥ ॥शॄ हिंसायां। शृणाति। शॄदॄपां ह्रस्वो वा लिटि
शशारतुः। शश्रतुः। शीर्यात्। शरीता। शरिता॥ पॄ पालनपूरणयोः। पृणाति। पपरतुः।
पप्रतुः। पूर्यात्॥ वॄ वरणे। वृणाति। ववरतुः। वूर्यात्॥ भॄ भर्त्सनभरणयोः। भृणाति। भ

वृ ऋत इति वेटो दीर्घः लुङि प्रेसे तिरिटो न दीर्घः अवारीत् अवारिष्ट तिसृदंतात् सिचो इति नेट इति गुणः वोहल इति मोर्ति दीर्घः अवरीष्ट लुलुवृवामिति दीर्घः ऋसंयोगादेरल्पकि लिङ्गुणः ऋतश्च संयोगादेरिति दीर्घः वृतो वा इति वेटो दीर्घः॥२॥

अतः हल्लोपः संयोगान्तस्य प्रत्ययस्य वा अपवादेः हेर्लुक्॥२॥

क्विप् च दृह प्राप्ति निपातः हस्वपक्षे॥ पपरतुः प्रपूर्य॥३॥

षीत्। मृ हिंसायां। मृणाति। मर्षीत्। दॄ विदारणे। दृणाति। ददरतुः। दद्रतुः। जॄ वयोहा-
नौ। जृणाति। नॄ नये। नृणाति। कॄ हिंसायां। कृणाति। ॠ गतौ। ऋणाति। अरांचक-
र। ईर्षीत्। अरिता। अरीता। आरीत्। गॄ शब्दे। गृणाति। ज्या वयोहानौ। ग्रहांक्रिति च
जिनाति। जिज्यौ। जिज्यतुः। जीयात्। अज्यासीत्। री गतिरेषणयोः। रिणाति। ली श्लेषणे
लिनाति। ललौ। लिलाय। लिल्यतुः। लाता। लेता। अलासीत्। अलेषीत्। व्ली वरणे।
व्लिनाति। प्ली गतौ। प्लिनाति॥ इति प्वादयः॥ व्री वरणे। व्रीणाति। भ्रीणाति। भ्री भय
भरणयोः। भ्रीणाति। श्रिणाति। क्षीष् हिंसायां। एषां त्रयाणां वा ह्रस्वः। क्षीणाति। क्षि-
णाति। ज्ञा अवबोधने। जानाति। बंध बंधने। बध्नाति। बबंधिथ। बबंद्ध। भंत्स्यति। अभा-
न्त्सीत्। अबांद्धां। मंथ विलोडने। मथ्नाति। श्रंथ ग्रंथ संदर्भे। शश्रंथ। शश्राथ। जग्रं-
थ। जग्राथ। कुंथ कुथ संश्लेषणक्लेशनयोः। चुकुंथ। चुकोथ। मृद मृड क्षोदे। मृद्ना-
ति। मृडाति। गुध रोषे। गुध्नाति। कुष निष्कर्षे। कुष्णाति। निरः कुषो वसादेरिड्वानपि

अपंपुस्तवि:संहोर्रे २

पीडावीं २
॥क्षुभ्नानान्नन्तु
हिंसायां क्लिश्नूवि
बाधाने क्लिश्नाति
अक्लेशीत॥२८
कदितोवाक्लेशिताक्ले
ष्टा ४

निष्कोषिता। निष्कोष्टा। निरकोषीत। निरकुषत॥ क्षुभ संचलने। क्षुभ्नाति। क्षुभ्नादिषु नणत्वं। अक्लिक्षत॥ अश भोजने। अश्नाति। आश। उध्रस उंछे। उध्रस्नाति। उकारो धात्ववयव इत्येके। उध्रसांचकार। विष विप्रयोगे। विषाण। वेष्टा। अविक्षत॥ पुष पुष्टौ। पोषिता। अपोषीत। मुष स्तेये। मोषिता। खच खव हिठ भूतप्रादुर्भावे। खच्नाति। खवो वस्य औत्वे। खौनाति। हिठ्णाति॥ इति पं॥ ॥वृङ् संभक्तौ। वृणीते। ववृषे। वरीषीष्ट। वरिषीष्ट॥ अवरिष्ट। अवरीष्ट। अवृत॥ इति क्र्यादयः॥ चुर स्तेये॥ चुरादेः स्वार्थे णिच्। सधातुः। चोरयति। चोरयांचकार। चौर्यात्। चोरयिता॥ णेरङ् णिश्रिं णेः॥ ऋदिल घो ह्रस्व उपधायाः॥ लघोर्दीर्घः। अचूचुरत्। अचचुरत। चिति स्मृत्यां। चिंतयति। अचिचिंतत्। चुरादेर्णिज्वेतिकेचित्। चिंतति। यंत्रि संकोचने। यंत्रयति। अययंत्रत्॥ ऊलडि उत्क्षेपणे॥ ओलंडयति। ऊलंडति। ओकार इत्येके। लंडयति। लंडति॥ अललंडत्। पीड अवगाहे। पीडयति। भ्राजभासभषदीपजीवमीलपीडांवोपधाया ह्रस्वो ङ परे नो। अपीपि

॥भ्राज भास दीप्तौ। भा षव्यक्तायां वाचि। दीपी दीप्तौ। जीव प्राणधारणे। मील मील
ने॥२॥

लड उपसेवायां स्नेह ह्रादिकासेवा उपसेवा ला
डयति उ चम् २

पुष्यति मिद् स्नादयं
सेट॥३
अप्रतिक्रोता सति
प्रादुर्भावः॥४

निकारो नित्स्वरिते
तनुते स्वर्थ॥६

स्तेन कर्मलुं रह न मिति
कावतद चोरयते ७

यंत्रनिरालस्त्रीति नु

॥ अचीकृतत् इत्यादौ धातोरुपधाया ऋत इरिति इर् प्राप्तः अपीपृथदित्यत्र उरदपवादः अचीकृ तदित्यत्र उरदपवादः अमीमृजदि
अमीमृजदित्यत्र मृजेर्वृद्धिरित्याप्राप्तः अपीपृथदित्यादौ त्यत्रा उरदपवादः ३
उपधायाश्चेति स्थाने नास्ति प्राप्तः ॥३॥

ड॒त्। अपिपीडत्। प्रथ प्रख्याने। प्रथयति। प्रथ्यात्। अत्स्मृदृत्वरप्रथम्रदस्तृस्पशां पूर्व
स्य अत् चङ्परे णौ इत्वापवादः। अपप्रथत्। पृथ प्रक्षेपे। पर्थयति। पर्थयांचकार। उ
पधाया ऋवर्णस्य ऋद्वा चङ्परे णौ इरामपवादः। अपीपृथत्। अपपर्थत्। मह पूज
ने। महयति। अममहत्। श्रण दाने। विश्राणयति। अशिश्रणत्। तड आघाते। ता
डयति। तडति। अतीतडत्॥ ज्ञप ज्ञानज्ञापनयोः। मित्। मितां ह्रस्वः॥ मितां धातूना
मुपधाया ह्रस्वो णौ। ज्ञपयति। अजिज्ञपत्। यम वेष्टने मित्। यमयति। अयीयम
त्। चह चप परिकल्कने मित्। चहयति। अचीचहत्। चपयति। अचीचपत्॥
रह त्यागे मित्। रहयति। अरीरहत्। बल प्राणने। बलयति। चिञ् चयने मित्। चि
स्फुरोर्णौ वा आत्वं। ततो णौ पुक्। ऋधातोः रादंतस्य च पुक् णौ। चपयति। स्फारयति
स्फोरयति। चययति। स्वार्थे णौ ज्ञपादिभ्योऽन्ये मितो न॥ कृत संशब्दने। कृतइर
धातोरुपधाया ऋत इर्। कीर्तयति। अचीकृतत्। अचिकीर्त्तत्॥ श्री कुम्भादाः

उपधाया ऋवर्णस्य ऋद्वा ङ परे णौ इर इत्यामपवादः १

स्वार्थे णौ ज्ञपादिभ्यो इत्यादि प्राप्तः ॥२॥ स्फुरो णौ तु स्थिति चेत्तु ... ३६

ऋत धातुः प्रायेण विपूर्वः ॥४॥ ज्ञप धातुः ज्ञाने ज्ञा ने चार्थे मित्प्रत्यय लक्षते मित् संज्ञा च ॥५॥

॥ चह चप एतौ परिकल्कने दंभे शाठ्ये चार्थे मित्संज्ञौ भव तः ॥७॥ चिञ् चयने चिनोतेः साहचर्यात्स्फुरस्येति २

स्व चितायां हृदयो ज्वितरासंक्रमेण प्र त्ययोने। भूय दर्द नेत्यत्र उपधाया दर्ने। स्पृश धातु पुरर्थ पयोः ॥१॥

॥ यम धातुः वेष्टनेऽर्थे मित्प्रत्ययं लभते मित् संज्ञां च कुरादौ यम यति चेद् उपरिवेष्टे घटादौ तु यम धातु र्ज्ञिते नेऽर्थे एव मित्॥ ॥ स्तक: स्त्राल तान् नोजयति ॥ ६ मुक्तमते पंच अवा दयः मतांतरे तु स प्त ॥ २ ॥ कुम्भादा नाड तिप्स्त्रम सि त्वा ३६ पालने पठितः परगामि फलोऽर्थ मिति ॥३॥

त्मनेपदिनः। चितसंचेतने। चेतयते। अचीचितत। दंशदशने। दंशयते। अददंश-
त॥ आकुस्मीयमात्मनेपदं णिजिसंनियोगे नैव। दंशाति। नलोपो न संज्ञिसाहचर्या-
द्दादेरेव तत्र ग्रहणात्। तत्रि कुटुंबधारणे॥ तंत्रयते। कुटुंबयते। मत्रि गुप्तभाष-
णे। मंत्रयते। अममंत्रत। शाम लक्ष आलोचने। शामयते। अशीशमत। लक्षयते। अ-
ललक्षत। दिवु परिकूजने। देवयते। गॄ विज्ञाने। गारयते। विद चेतनाख्याननिवा-
सेषु। वेदयते। अवीविदत। कुस्म नाम्नो वा। कुस्मेति धातुः कुत्सितस्मयने। कु-
स्मयते। अचुकुस्मत॥ अथवा कुस्मेति नामतो णिः। कण निमीलने। कणयति॥
नैवगण्यामुक्तेभ्यो हिंसार्थेभ्यः स्वार्थे णिः। हिंसयति। ज्ञा नियोगे। आज्ञापयति॥
ज्ञाप्यात्॥ भू मिश्रीकरणचिंतनयोः। भावयति। अबीभवत। लोकृ लोचृ भाषणे
ऋदितः। ऋदितः। णावसमर्थस्योपधाया ह्रस्वो न। अलुलोकत। अलुलोचत। धू-
ञ् कंपने॥ धूञ्प्रीञोर्नुक् णौ॥ धूनयति। अदूधनत। धवति। प्रीञ् तर्पणे। प्रीण-

इत्याकुस्मीयाः इ आदि सुन वसु गतो ये हिंसार्था धातवस्तेभ्यः स्वार्थे णिप्रत्ययः नत्वन्येभ्यो ये हिंसार्था न भवन्ति तेभ्यो धातुभ्यः प्रयो-
जककर्त्तरि णिः प्रत्ययो भवतीत्यर्थः चुरादिगणास्ते भ्यस्तु स्वार्थ एव णिप्रत्ययो भवतीति ४

सचेतनं मनश्चेतयते अचीचितत स्यात् मिहस्तु तर कालिकं सानम् १

चाक्रीः कुस्म धातु सपि बदन्ते ते कुस्मयते ३

पूर्वातस्मयते अपि पिटस्मयते इति स्मृते लट्प्रत्यये णिलोप तथा सेव स्मृते णिष्य न कुस्मेति नामाई स्मानयति हिंसेत्योत्मानार्थाः॥ ८ सूली तिचंपकः वना लिफलो लक्षो कं चूतं फलाति फलति कुत्सितानि मुकुलं वायुर्वा चलयति चंपकपुष्प रेणुस्तत्कानने धवति चंदनमजरीश्च॥ १॥ अर्थं धातुः स्वादो तुदादो कादौ चुरादौ वादौ च॥ १२॥

न सुखमिदं सुख पर ५ च धाश यथा तो रूप सार्थो णिः प्रयरशीना णीपि प्रयो गः तड़ः व लोर्थ पि ८

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे विदते विंदते प्राप्तौ प्रयन् कुल पूर्व बोधि दंक्रमात्॥ ५॥ एकनेत्र मीलनेश्वा येन सूक्ष्ममाभाति कण रलेखनेन वा इत्यत्वः अचीकणत् अचकाण तु॥ ५॥

व स्थमालोपुधातुषु अंत्यावयवो॥ अचः परस्मिन् पूर्वविधौ परनिमित्तो आदेशः स्थानिवत्स्यात् स्थानिभूतादचः पूर्वत्वे
अकारो विवक्षितो न तु स्वार्थः॥ न इष्ट स्थविधौ कर्तव्ये लोपो व्यादेशश्च अन्ते न तु वर्णमात्रविधौ स्थानिन्न स्वर्णमात्रमा
॥१॥ भौवू अन्त्ययो विधिः क्रियते सः

पति॥पर्व्विल्लिणत्। पर्व्वयति॥ अथादंताः॥ कथ वाक्यप्रबंधे॥ अल्लोपः स्थानिवत्तते
नटद्विर्न। कथयति। अल्लोपिनो नाऽकार्य्यं॥ अचकथत्। वटईप्सायां। वटय
ति। अवटत्। गणसंख्याने। गणयति। गणेःपूर्वस्य ईद्वा। चङ्परे। अजीगणत्। अ
जगणत्। स्तनगदद्देवशब्दे। स्तनयति। गदयति। अतस्तनत्। अजगदत्। पतगतौ
वा स्यांतः। पतयति। पतति। पतांचकार। अपतीत्। अपपतत्॥ वाऽदंत इत्येके॥
पातयति। अपीपतत्। पखप्रतिपत्तौ। रचयति। अररचत्। कलगतौ संख्याने च
॥कलयति। अचकलत्। स्पृहईप्सायां। स्पृहयति। भामक्रोधे। भामयति। अब
भामत्॥ सूचपैशून्ये। सूचयति। असुसूचत्। सूत्रवेष्टने। सूत्रयति। असुसूत्रत्
मूत्रप्रस्रवणे। मूत्रयति। अमुमूत्रत्। [illegible]। ऊनपरिहाणे। ऊनयति। निमि
त्तःस्वरादेशो द्वित्वे कर्तव्ये स्थानिवत्। स्वरादेः परः॥ स्वरादेर्धातोर्द्वितीयो ऽवय
वोऽद्विरुक्तःसस्वरो द्विर्भवति। औनिनत्। अर्थइयाचने। अर्थयते। आर्तथ

अ अ र अ अ अ अ च ष्ट तस्य लोपो वि घते अस्मिन् स अ ष्ट लोपी तस्य॥२॥
सि॰ चं॰ नु॰
३१ ब३
अनेकस्वरत्वां दाम पतयांचकार ५
पूर्वीवस्यां सारत्वागे न सतो गुणांतराधा नं प्रतिपत्तौ॥६॥
पिशुनो दुर्जनस्तस्य कर्म पैशुन्यं तस्मिन्॥४॥
न पाष्टस्य द्वित्वं कर्तव्ये पतइत्यल्लोपः॥१॥

वटईप्सायां वटयति अववटत् इत्यपि पाठः २
आत्मुमिकाईसातस्याम् २
आत्मुमिकाईप्सातस्यां॥७॥ ७५
अपस्पृहत्
वोपदेवस्तु धातो नोभिन इति वृद्धौ हृ ३१ तावांतातो औ कुक् इति पुकि कृते अर्थापयते इति रूपमाह अर्थयते॥१॥

भ्वादि १ अदादि २ ह्वादि ३ दिवादि ४ स्वादि ५ रुधादि ६ तनादि ७ तुदादि ८ क्र्यादि ९ चुरादि १० गणाः १०

॥ प्रेरकत्वव्यापारे प्रेरणे स च प्रेरकः चेतनाचेतनसाधारणत्वेन विवक्षितः स च क्वचित् सिद्धः क्व... फलरूपः देवदत्तः पाचयति गमयतीत्यादौ सिद्धः णिच्चा वासयति संग्रामो वासयतीत्यादौ फलरूपः अत्र प्रयोज्यव्यापारोपहिते प्रयोज्यकव्यापारोपहिते प्रयोजकव्यापारे णिः प्रयोज्यव्यापारानुपहिते प्रयोजकव्यापारे लोट् च भवति णिको रोणित्त्वमित्येतदर्थः ॥२॥

त । संग्रामङ् युद्धे । असंसंग्रामत । अंध दृष्ट्युपघाते । (दर्शनाभावे) आंदधत् ॥ अंक संग्रांपदे लक्षणे । आंचकात ॥ इति चुरादयः ॥ ॥ धातोः प्रेरणे ॥ प्रयोजकव्यापारेऽर्थे धातोर्णिप्रत्ययः । भवंतं प्रेरयति भावयति भावयेत भावयांबभूव । अइसयोः पूर्वस्योकारस्य पवर्गयवरलजकारे अवर्णपरेषु परतः ॥ अबीभवत् । भूङ् बंधने भावयति ॥ अभीभवत् । अपीपवत् ॥ अरीरवत् । अलीलवत् । अजीजवत् । स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनामाऽइसयोः पूर्वस्येत्वं वाऽवर्णपरे धात्वक्षरे परे । असिस्रवत् । असुस्रवत् । अशिश्रवत् । अशुश्रवत् । अदिद्रवत् । अदुद्रवत् ॥ अपिप्रवत् । अपुप्रवत् । अपिप्लवत् । अपुप्लवत् । अचिच्यवत् । अचुच्यवत् । नरितः । (शासेः प्रे॰ शासयति) अशशासत् । (ढौके भाने प्रे॰ ढौकयति) अडुढौकत् । ण्यंतानां णिः । णेः । चौरयति । अचचुरत । हनो घत । हंतेर्घादादेशः णौ वर्जिते णिति । घातयति ॥ अजीघतत । शादेरतो ऽतो ऽनो । (शीयमाने प्र॰) शातयति । अशीशतत । गतौ तु शादयति । ११

ऋ गतौ । श्रु श्रवणे । द्रु गतौ । प्रुङ् प्लुङ् च्युङ् गतौ । अत्र हि अत्र वर्णपर्यायः ६

प्रयोजकः प्रेरकस्य व्यापारानुकूलवान् व्यापार लक्षणो णिरूपकरणो

सम्प्रहृ हि... तरवेडे ... आदि ... पूर्वखंडे तुहलादीर्घः ३

गतः शादयति ... गमयतीत्यर्थः १

॥ तॄ प्लवनतरणयोः स्तृतदइत् तरितुमिच्छति। गुरू संवरणे सप्रत्यये द्वित्वे कृते होढः ष ढोः कःसे क्षिलात्सः सः कृतस्य षत्वस्यासिद्धत्वात् आदिजबानामिति घः जुघक्षति स्वरांतस्य धातोर्दीर्घः स्यात् से चिनोतेः स लादौ किर्वा॥ २॥

गुहिस्थांचपरस्यसस्यनेट् । नाँनिँटिसे । इदुज्झितेसप्रत्ययेगुणोन । तितीर्षति ॥ सेदीर्घः । चिकीर्षति । पुभिश्रणे । पवितुमिच्छति । जिगीषति । बुबूषयति । धःसे पिपक्षति । पिपासति । मुमूर्षति । पुपूर्षति । बुबूर्षति । रुदविदमुषग्रहिस्वपिप्रछःसंकित । रुरुदिषति । विविदिषति । मुमुषिषति । होढः । आदिजबानां षढो । जिघृक्षति । ग्रहीतुमिच्छति । सुषुप्सति ॥ इगुपधेप्रच्छिम्पःसस्येट् ॥ चिकरिषति । जिगरिषति । जिगलिषति । दिदरिषते । दिधरिषते । गुणः । ग्रहांदइ आदेशे । धइ अवस्थाने । पिपक्षिषति । अवृतुमिच्छति । जिघत्सति । हनिङो सेदीर्घः । जिघांसति । इङःसिगम् । सांतात्सर्वत्रदात् । अधिजिगांसते । गमेःसस्येट्नाति । जिगमिषति । इस्से । अपिहाधारलभशकपदपतभिमामाउमेडोस्वरस्येस । अनिटिसेपरेपूर्वस्यचलोपः । दित्सति । रभराभस्ये । रचोराधोष्ठ । लभेचपाफसानाम् । तुलभबुप्राप्तौ । लिप्सते । शिक्षति । पित्सते ॥

शक्लृ शक्तौ स्वादिः पं शकमर्षणे दिवादिः पं सेट् केषांचिन्मतेऽनिट् पद गतौ दिवादिरात् पत्लृ पतने भ्वादिः पं डुमिञ् प्रक्षेपणे स्वादि रुभयपदी मीञ् हिंसायां क्र्यादि रुभयपदी मा माने अदादिः पं माङ् माने ह्वादि रात दिवादिरात् मेङ् प्रणिदाने भ्वादिः ॥ ३॥

कर्तुमिच्छति २ जिहीर्षति २ नदरेयुसिन्नाम्ने २

सि॰ कौं॰ उ॰

६० दुपचष पा॰ के॰ ३

पवालन रकरणे ३ पूरसंवरणे ३ ग्रहउपादाने ५

मिसकोरदेर्धेहलनिटिन् गृहीतस्तौनविप ५

पूर्वीतहंतेर्हस्तघः ट॥

दित्सते १

जिगयेजेतुमिच्छति २

सदसाहचर्याद् तेरेवग्रहणं॥ ३॥

दाण दाने भ्वादिः पं देङ् पालने भ्वादि : शात डुदाञ् दाने १ ह्वादिरात दो अवखंडने दिवादिः पं डुधाञ् धारणपोषणयो राते ह्वादिः इणिः भ्वादिरात डुलभष प्राप्तौ भ्वादिरात ॥ ३॥

धित्सति २ शकुमि ६० पत्नुमि भिसति धित्सते २

पततनदरिद्राभ्यः सस्येत्वा। पित्सति। पिपतिषति। मित्सति। मित्सते। आप्नोते री। आप्नोते रात ईस्स पूर्वलोपश्च। ईप्सति। अशेरनायो वा। अशेरिच्छायां वानाय प्रत्ययः। अशनायति। अशिशिषति। तितनिषति। तितंसति। तनेः सादौ वा दीर्घः। तितांसति। दिदरिद्रिषति। दिदरिद्रासति। दंभिज्ञपिभ्यां सस्य वेट्। दिदंभिषति। जिज्ञपयिषति। ज्ञपेः स्वरस्य सादौ सेईत पूर्वलोपश्च॥ दंभेरिच्च। धीप्सति। धिप्सति। धीप्सति। इवंतऋधभ्रस्जश्रिस्वृयूर्णुभरज्ञपिसनिभ्यः सस्येड्वा। दिदेविषति। दुद्यूषति। लिटि सेऽकः। दुद्यूषति। अर्दिधिषति। ऋधेरनिटि सेत्वरस्य ईरन्। ईर्त्सति। बिभ्रज्जिषति। भ्रस्जोरसोररनपि वा। बिभर्जिषति। बिभ्रक्षति। बिभर्क्षति। शिश्रयिषति। शिश्रीषति। स्वृशब्दोपतापयोः॥ सिस्वरिषति। सुस्वूर्षति। यियविषति। युयूषति। ऊर्णुनुविषति। ऊर्णुनविषति। ऊर्णुनूषति [illegible] बिभरिषति। बुभूर्षति। सौं

॥ छिन्नत्वहृस्वस्यादिलात् सरस्य स्तौति ष्यंतयोः सस्यष: स्यात् घ नृते सेत्त्वापि: ष्यंतः स्वापयितुमिच्छति स्तोतुमिच्छति। सेदीर्घः इति दीर्घः बुसेइति नेट् नत्वे तुष्टूषति स्यातुमिच्छति। स्वापयितुमिच्छति स्वप्तुमिच्छति। सुष्वापयिषति। रा

तिण्यन्तयोरेव षे पूर्वात्सस्य षः । तुष्टूषति । षे किं । तिष्ठासति । सुषुप्सति । सिषाधयिष
ति । स्तौतिण्यन्तयोः किं । सिसनिषति । सिषासति । अनिटि सेन पधानस्य लोपः ।
तृंहू हिंसायां । तितृक्षति । तितृंहिषति । इणः सेगमनबोधने । जिगमिषति । बो
धने तु । प्रतीषिषति । इणवदिकः । अधिजिगमिषति । २ । इवर्णोवर्णोपधाद्धला
देः । रसां तातहां ता च क्त्वा सौ सेटौ वा कितौ । दिद्युतिषते । दिद्योतिषते । रुरु
चिषते । रुरोचिषते । लिलिखिषति । सिस्निहिषति । सिस्नेहिषति । स्निहितु सि
सिस्निग्रहति । ग्रधो हिंसायां भिस्से हित्वलोपश्च । रिप्सति । अन्यत्रारिरप्सति
। मुचोऽकर्मकस्य गुणो वा सि हित्वलोपश्च । मोक्षते । मुमुक्षते वा वत्सः स्वयमे
व । अकर्मके किं । मुमुक्षति वत्सं कृष्णः । वि । वृत्सति । अत्र तु विवर्तिषते ।
न तत्तद्वृत्त च तत्कृड्योः सेः मादे रिड्वा ॥ निनर्तिषति । निनृत्सति । दरि दृप्
कृदं तात्सस्येड्वा । तितरिषति । तितरीषति । तितीर्षति । विवरिषति । वुवूर्षति ॥

सिं० चं० नु०

ल्लिलेखिषति ६

लिलिख स्वरूराव न्मासे । ६९

डनिटि ४

लल सं स क्लो अनस न इत्यात्वम् २८

द्युति स्वाप्योः पूर्व स्येति संप्रसारणं ५

नानिटि सेइतिन गुणः मोक्षु मिष तो ७

९२

इदोग्रहाः

॥ षढे ईङ् क्रीजीनामित्यात्वं स्वरादेः परः इति पिशाद्यस्य द्वित्वे अध्यापयितुमिच्छति श्वयतेर्ण्यन्तस्येति संप्रसारणं वा संप्रसारणे कृते द्वित्वं सुशावयिषति । श्वापयितुमिच्छति ह्वयतेरङ्सपरे नावितिसंप्रसारणं युगभावश्च जुहावयिषतुमिच्छति पूर्वद्वित्वं ततः स्फुरोनीविति आत्वं वा दुहुः धाद्वे ह्वावयितुमिच्छति चुहावयिषति । पूङ् पावयितुमिच्छति ॥७॥

विवरीषति । षढंतात्सस्य कित्वं वाच्यं । एवं । इङ्संप्रसक्तौ । विवरिषते । उच्छृं छेच्छस्य द्वित्वं पुनश्च पत्वं च छिद्रत्यस्य द्वित्वे हलादिशेषे च उचिच्छिषति । अध्यापयितुमिच्छति । अङ्सपरे नावित्यनेन इङो गावा रात्नो नाविति तुक् । ध्वको टिल्ये । दिध्वरिषति । दिध्वरीषति । दुधूर्षति । दुधूर्षते । स्मिपूङ्रंज्वशां सनि । स्मयेट् ॥ सिस्मयिषते । पिपविषते । अरिरिषति । अंजिजिषति । अशिशिषते । उचिच्छिषति । जिगापयिषति । षढे ईङ् क्रीजीनामित्यात्वं पिशाद्यस्य द्वित्वे । अध्यापिपयिषति । अधिजिगापयिषते । अध्यापिपयिषते । शिश्वापयिषति । सुश्वावयिषति । जुहावयिषति । पुस्फारयिषति । ह्वावयितुमि । चुहावयिषति । पिपावयिषति ॥ बिभावयिषति । पिप्यावयिषति । ररावयिषति । [illegible] लिलावयिषति । सिस्रावयिषति । सुस्रावयिषति । लावयितुमि । सांतात्सोन त्वार्थे सांतानुः स्यादेव । जुगुप्सिषते ॥ इति सन्प्रक्रिया ॥ ॥ अतिशायेहलादेर्यङ् द्विश्च ॥

स्नातुमिच्छति । पवितुमिच्छति । अश्नुतिस स्येयातो गुणः अरे षेतिजातेरिसवा छस्येद्वित्वं अंजितुमिच्छति अशश्नोज नेक्रादिः ॥५॥

गुप जोपनकुत्सनयोः जुगुप्सितुमिच्छति गुपूरक्षणे गुप्तः इतेत्वार्थेसः ततः इच्छायां सः ॥२॥

सिङ् ईषद्धसने पूङ् पवने स्नातौ अरे अक्तिकृष्णकांति गतिषु अशनोजनिर्द

श्वयतेर्ण्यन्तस्य संप्रसारणं वाङ् सयोः ५

अवतिस्फुरोतिद्ध वतीत्वं वा ॥३॥

सि॰चं॰उ॰

६२

॥अस्लोपः स्थानिवत्। आदेः परस्य यद्विहितं तत्तस्यादेर्बोध्यं इत्यनेन यलोपः यत इत्यस्य लोपः। अतिशयेन मुह्यति। अतिशयेन लेढि। अतिशयेन जुहोति। अतिशयेन वेत्ति। अतिशयेन पचति। अतिशयेन पठति॥ ५॥

हसादेरेकस्वराद्धातोरतिशयेऽर्थे यो नः पुन्ये च यङ्प्रत्ययो धातोर्द्विर्वचनं। या
ङि। यङि यङ्लुकि च पूर्वस्य नामिनो गुणः। स धातुः ङित्वादात्। अतिशयेन पु
नः पुनर्वा भवति। बोभूयते बोभूयांचक्रे। अबोभूयिष्ट बोभूयिषातां। अ
तिशयेन भुनक्ति। बोभुज्यते॥ यतः॥ अनपि च हसात्। हसादुत्तरस्य यस्य लोपो
भवत्यनपि विषये। बोभुजांचक्रे। मोमुह्यते। लेलिह्यते। जोहूयते॥ वेविद्यते।
आतः॥ यङि यङ्लुकि च पूर्वस्यात आकारः। पापच्यते। पापठ्यते। सिचो यङि
न सस्य षः सिचेः सस्य षत्वं न स्यात्। यङ्प्रत्यये परे षिच क्षरणे सेसिच्यते॥
सं स्विम स्त्रिम स्यच स्यम स्तीति स्योयङि। सोसच्यते। स्तन वेष्टने। सोसूच्यते। मूत्र
प्रस्रवणे। मोमूत्र्यते। यकारपरे रेफस्य न द्वित्वनिषेधः। अरार्यते। ऊर्णोनू
यते। गत्यर्थात्कौटिल्य एव यङ् (न त्वतिशयेऽर्थे)॥ कुटिलमटति। अटाट्यते। (कुटिलं व्रजति) वाव्रज्यते। लुप
सद चर जप जभ दह दंश गॄभ्यो धात्वर्थगर्हायामेव यङ्। गर्हितं लुंपति

सूचये पुन्ये। मूत्र
प्रस्रवणे। सूत्र वेष्टने
इत्येचुरादयोऽदन्ता
॥६॥
कुटिलमटतीति मुले
र्हि इति गुणः अरार्यते
अतिशयेनाऽर्त्तेऽ
यङ् आर्तेः समाते
च अतिशयेन ऊर्णोति
ति कुटिलं अटति
कुटिलं व्रजति॥२॥

यो॰ ६

अतिशयेन सिंचति
अतिशयेन पुनः पुनर्वा स
च्यतीति अ॰पु॰ सूत्र
यतीति अ॰पु॰ मूत्र य
तीति ६ अ॰पु॰ ऋच्छति
ऊर्णोति संयोगाद्योः
स्वरादेः परः ३

६२

गुणो ऋते ऽर्शः सस्या द्वि
त्वे हसादि शेषे आ
र इति दीर्घः ३

॥ गर्हितं गिरति। अतिशयेन यच्छति। अतिशयेन कामयति। अतिशयेन तनोति। गर्हितं जनति। गर्हितं दहति। गर्हितं दशति। गर्हितं पशति। पुश धातुः सौत्रो गत्यर्थः दंत्योतः तालव्यान्तश्च। अतिशयेन भनक्ति। अतिशयेन गृह्णाति। अतिशयेन रुष्यति। अतिशयेन छंदति। ग्रहोमिति संप्रसारणं। अतिशयेन कल्पते क्रपो रो लः इत्युभयत्र लत्वं॥५॥

लोलुप्यते। सासद्यते। जमजपां नुक्। जमांतस्य जपजभदहदशभंजपसचर
फलां च पूर्वस्य नुक् यङ्लुकोः। चरफलोः पूर्वोत्परस्यात उत् यङ्लुकोः। च
ञ्चूर्यते। चंचूर्यते। चंचुरां चक्रे। पंफुल्यते। पम्फुल्यते। तुगित्यनेनानुस्वा
रो लक्ष्यते स च पदांतवत्। जंजप्यते। गिरतेरेफस्य लत्वं यङि। जंगिल्यते। पंप
स्यते। चंकम्यते। चंखन्यते। तंतन्यते। जंजल्यते। दंदश्यते। वंभज्यते। पसवा
धग्रंथनयोः। पंपस्यते। रीगृदुपधस्य (ॠदुपधस्य)। ऋत्वतो धातोर्यङि परे पूर्वस्य रीक्। नरी
नृत्यते। वरीवृत्यते। जरीगृह्यते। वरीवृश्च्यते। परीपृच्छ्यते। चरीकृप्यते। वशोर्य
ङि न संप्रसारणं। वावश्यते। श्वयतेर्वा। शोशूयते। शेश्वीयते। ला (गुणोऽर्त्ति संयोगाद्योः)
स्मर्यते। कवतेः। पूर्वस्य न चुत्वं यङि। (कुङ् शब्दे) कोकूयते। वंचु गतौ। वंचु स्रंसु ध्वंसु भ्रंसु क
स पत पद स्कंदां यङि लुकि च पूर्वस्य नीक्। (नीलोपः) वनीवच्यते। सनीस्रस्यते। दनीध्वस्यते।
बनीभ्रस्यते। चनीकस्यते। पनीपत्यते। पनीपद्यते। चनीस्कद्यते। ऋतोरः। घे। चे

गर्हितं सीदति॥२
सद्लृ विशरणगत्यवसादनेषु

चरगतिभक्षणयोः
गर्हितं चरति वा ३
पदांतस्येति वा परसवर्णः ३
गर्हितं जपति ४
जप जल्प व्यक्तायां वाचि ४
टुओश्वि गतिवृद्ध्योः। कस
धावने। स्रंसु ध्वंसु भ्रंसु अध:
पतने। कस गतिशासनयोः। प
ट्लृ पतने। पद्ल गतौ॥
अतिशयेन नर्तति। ऋत्वा
दित्युक्तत्वात् रीगत्वात्
कः अतिशयेन वर्तते॥
कवतेरित्यपानिर्देशात्
कुङ् शब्दे भ्वादिः। कूङ्
शब्दे तुदादिश्च अतिश
येन कवते॥३॥
स्कंदिर् गतिशोषणयोः १

...मनकु परमं। करनिमील
नेतनु विस्तारे। जनिप्रा
दुर्भावे। दहभस्मीकर
णे। दंश दशने। भंजु आम
र्दने... विदैव
तुवर्तने। ग्रह उपादाने। ओ
व्रश्चू छेदने। प्रछ ज्ञीप्सायां
कृपू सामर्थ्ये। वशकांतौ।
फल निष्पत्तौ।
अतिशयेन फलति
३
गृ निगरणे... गर्हि
तं गिरति ४
एक त्रैसप्तपञ्चैसप्त
... ४ वा धावी
त ५

अतिशयेन श्वयति श्वय
तेः संप्रसारणं वा स्य
ति यङि परे अतिश
येन श्वयति ये दीर्घः
अतिशयेन स्मरति गु
णोऽर्तिसंयोगाद्योः आत
इत्यालोपः॥
वंचतेरिति स्रंसते ध्वं
सते भ्रंसते इति कस
तीति पतते इति प
दतीति स्कंदतीति

॥उदात्तदाने।दाणदाने।दो अवखंडने।देङ्पालने।एवंदारूपं।दुधाञ्धारणपोषणयोः।मामाने।माङ्माने।मेङ्प्रणिदाने।एवंमारूपं।कैगैशब्दे।ओहाक्त्यागे।पापाने।षोन्तकर्मणि।ष्ठागतिनिवृत्तौ॥११॥
दुकृञ्करणे।हृञ्हरणे।भ्रिमसरणे।१२

प्रतिशायेनकरोतीति। हरतिहरतीतिवल्गा तिवा॥१॥ पर्णर्ङ्केतेहलघः जग ज्ञेनुकर्षे

सिध्येऽनुं
अतिशायेनददातिद धातिमा तिजाय तिजहाति ३ पिबति स्यति।तिष्ठति॥२॥ निषुपश्चये।स्यमुपा षु।व्येञ्संवरणे।चा यपूजानिशामनयोः।जनीप्रादुर्भावे।जन सनखनामित्यात्वं। अतिशायेनस्वपिति।स्यमति।व्ययतीति। अतिशायेनचायति।जायते।जाज्ञायते। ६॥

कीयते। जेहीयते। वेव्रीयते। दादेरः॥ अपिहाधामागेहाकपिबतिसोस्यामिका
रः। किंतिहसे अनपि। देदीयते। देधीयते। मेमीयते। जेगीयते। जेहीयते। पेपीयते
सेषीयते। तेष्ठीयते। घ्राध्मोरीयङि। जेघ्रीयते। देध्मीयते। हंतेर्हिंसायांघ्नी। जेघ्नीय
ते। जंघन्यते। स्वपिस्यमिव्येञांयङि संप्रसारणं। सोषुप्यते। सेसिम्यते। वेवीयते॥
चायः कीयङि। चेकीयते। जाज्ञायते। जेजीयते। जंजन्यते। शीङोः यङ्ये किति
शाशय्यते॥ डोढौकयते। तोत्रौकयते॥ इतियङ्प्रक्रिया॥ ॥वोन्यत्र। रुक्
प्रत्ययसंयोगंविनायङोवालुक्। यङ्लुकिसतिपितः स्मोवेट्। वोभवीति
वोभोति। वोभूतः। वोभुवति। यङ्लुङ्तांसं। नानध्योर्ब्वः। इत्सुव। अदादित्वा
दपोलुक्। वोभुवांचकार। गुणंबाधित्वानित्यत्वाद्वुक्। अवोभवीत्। अ
वोभोत्। अवोभूतां। अवोभवुः। पापचीति। पापक्ति। पापक्तः। पापचति
अपापचीत्। दिस्योर्हसात्। अपापक्। अपापक्ति। अपापक्तां। अपापचुः

।दादेः पेद्रतिसिलुक्यङिलुकि। सतीतिईटिपक्षेगुणःसिलौ। पेद्रतिलुक् ...॥३॥

स्वभूसत्तायां... तत्वान्वोधदेशः।४

घ्राणगंधोपादाने।ध्माशब्दाग्निसंयोगयोः।हनहिंसागत्योः

अतिशायेनजिघ्रति धमति।३। अतिशा येनहंति अर्थयङिहिं सायांकिं॥३॥ अतिशायेनशेते।प रत्वादेतरंगत्वाच्च गुणप्रयङ्ततो द्वित्वे ढौकृगतौ।कृत्वादे शेसंज्ञकरणमि सुतः।६। अतिशायेन ढौकते त्रौकते।६। अननुस्वइत्सुवत्स्व गुणइतिगुणः।अ वोभवुः।७।

६२

॥ गुजवालना॥ व्यवहारयोः॥ अति॥ पु॥ गुजति॥ वदि विक्रायां ॥ अ॥ पु॥ वदति॥ घट चेष्टायां ॥ अ॥ पु॥ घटति॥ नाथृ नाधृ याञ्चोपतापैश्वर्याशीःषु॥ अ॥ पु॥ नाथति॥ दध धारणे॥ अ॥ पु॥ दधति॥ कुरु शब्दकरणे॥ अ॥ पु॥ कुरति॥ १ छ्रेच खः॥ पराभवे च्छो ३

पापचां चकार। अपापचीत्। हे॥ स्वरे पिनोपधायां गुणः। वोभुजीति। वोभोक्ति। अवोभुजीत्। अवोभोक्। वोभोजिता। अवोभोजीत्। वावदीति। वावत्ति। जाघटीति। जाघट्टि। जाघटीषि। स्पर्द्ध संघर्षे। पास्पर्द्धीति। पास्पर्द्धि। पास्पर्द्धः। हो। पास्पर्द्धि। अपास्पर्त्। पास्पर्द्धां चकार। सिपि। अपास्पाः। अपास्पर्द्धाः। नाथृ प्रतिष्ठालिप्सयोः। जाघाद्धि। जाघात्ति। अजाघात्। सिपि। अजाघाः। अजाघात्। नाथृ। नानात्ति। नानाधीति। नानात्तः। दध। दादद्धि। दादद्धः। दाधत्ति। अदाधत्। अदादद्धां। अदादधः। अदाधः। अदाधत्। दादधिता। अदादधीत्। चोस्कुंदीति। चोस्कुंत्ति। अचोस्कुंत्। अचोस्कुंदीत्। मोमुदीति। मोमोत्ति। कुर्द खुर्द गुर्द कुर्द क्रीडायां। चोकूर्दीति। चोकूर्त्ति। अचोकूर्त्। सिपि। अचोकूः। ऋदंतानामदुपधानां च यङ्लुकि पूर्वस्य रुक् रिक् रीक्। चर्करीति। [illegible]। चरीकरीति। चरीकरीति। चर्कर्त्ति। चरिकर्त्ति। चरीकर्त्ति। चर्कृतः। चरिकृतः। चरीकृतः। च

॥ लङि अचर्करीत् इडभावे दिस्योरिति दिप सिपो लोपः अचर्कः। आशिषि यादादेशे इतिरिङ् चर्क्रियात्॥ २॥

॥ दिस्योरिति दिप सिपो लोपः संयोगांतस्येति धः लोपः। वावसानेति वावत्ति। इडभावे सिलोपे च कृते धस्य अवसाने इति वादः दः सः इति दस्य सः। दोषामित्यस्य रः सिलोपादी धिप्येति रलोपदीर्घौ अपास्पात्। ई नयोर्ह इति धः सिपि आद्विनवानामितितः। सिपि अजाघाः। दस्योरिति सिलोपे वावसाने दः सः इति दस्य सः आद्विनवानामितिधः। ५ स्कुंदि आप्रवणे अतिशयेन स्कुंदते लङि अचोस्कुंदीत् इडभावे दिस्योरिति दिप्सिपोर्लोपः संयोगांतस्येति दस्य लोपः। ४ बुधिह चे हेः स्वरे इति वीनगुणः। ४॥

लिप्सा ४।

अतो हलादेरितिवा वृद्धिः अदादधीत् ५ अचोस्कुंत्। अचोस्कुंदः ५

सि० चं० उ०

हौ लोपस्त्वनुदात्तत नामित्यनु ... नासिक ६६ लोप स्यासिद्धत्वात् अत इति हेर्लुग् न भवति जंगहि लङि दिस्यो रिति द्विप सिपोर्लो पः मोनो धातोरि ति नः अजंगन् ल ङि अनुबंध निर्दे शात् लिसुपादेरि ति ङः स्यंते तिन वृद्धिः अजंगमीत् ३ अचंखनीत् अ चंखन् अचंखातां ३ अचंखानी हस्रतो हलादेरिति वृ...

॥वंचु गतौ वंचतीति गत्यर्थात् कौटिल्य इति यङ् वंचुस्रंसुध्वंसु इति पूर्वसनीक् लुकि न तन्निमित्तं इति यङो लुका लुप्त त्वात् तदाश्रितो न लोपो न भवति। लुङि अवर्वृतीत् इडभावे तत्सत्वे तिलोपेन अवर्वृत् सिपि वावसाने इति दत्व पक्षे दः सः इति सः दोषाभितिरः सिलोप इति रलोपदीर्घो अवर्वाः लटि वृतादिभ्यः सस्येति आत्मनेपदं निर्दे शात् वर्वर्तिष्यति। लिसुपादे इति ङो न गुणः निर्दिष्टत्वात्॥२

क्रीति। चरिक्रति। चरीक्रति। अचकीरीत्। वर्वृतीति। वरिवृतीति। वरीवृतीति। वर्वर्त्ति। वरिवर्त्ति। वरीवर्त्ति। वंनीवंचीति। वनीवंक्ति। वनीवक्तः। वनीवचति। जंगमीति। जंगंति। जंगतः। जंग्मति। जंगन्मि। जंगमीमि। जंगन्वः। जंगन्मः। जंघनीति। जंघंति। जंघतः। जंघ्नति। जंघन्यात्। जंघहि। अजंघनीत्। अजंघन्। आशिषि वध्यात्। अवधीत्। अवधिष्टां। चंचूर्त्ति। चंचुरीति। चंचूर्त्तः। चंचुरति। अचंचुरीत्। अचंचूः। चंखनीति। चंखंति। चंख्यातः। चंखन्ति। चंखायात्। चंखन्यात्। जनसनखनेस्यात्वं हौ। जनसनेतिस्त्रेह कारश्च क्ङितीति वक्तव्यं तेन। चंखाहि। आशिषि। चंखनानि। अचंखनीत्। अचंखन्। अचंखातां। अचंखुः। अचंखनीत्। अचंखानीत्। यायोति। यायवीति। अयायवीत्। अयायोत्। यायविता। अयायावीत्। नोनवीति। नोनोति। जाहति। जाहाति। जाहीतः। जाहति जाहीहि। यथा॥ अपातिपानुबंधेन निर्दिष्टं यद्गणेन च। यत्रैक ग्रहणं चैव पंचैता

॥अपेत्यादि अपा यथा इवंतक्रुधस्तत्स्थ पूर्णुभरसनिस्यः सस्येट्वा १ तिपा यथा स्यति हंति यातिवाति ... द्राति प्साति वपति वहति ... विनोति दे... २ अनुबंधेन निर्देशो द्विधा ... येन इत्से... तकेन च आद्यो यथा दीङो युडचि क्ङिति स्वरस्य द्वितीयस्तु आदनुदात्तङितः इत्यादि ३ गणेन यथा ... दीति चेक्षिदीति ... दिता ...

वनुवर्त्तेः प्रयुवर्तीति। गङ्गतौ कुटिलं गच्छति। चर गति भक्षणयोः। हन् हिंसा गत्योः। खनु खनने। पुमिश्च लो प्रभिमुखो चाङ्गो हीकुला ग॥

अवनीवचीत् अवनीवन् २॥ अजंगमीत् अजंगमिष्टां ३

ज्मजनपाभिति नुक् लोपस्त्वनुदात्ततना मिति न लोपः ४६॥ हनो ... लिङ्ङोर्वधः लु ङ्यात्मिनाः ६ चरफलोः पूर्वं स्यात् उत् न भवति यङि यङः लुकोः ५ चंखनीति चंखाहि चंख नानि ६

हेस्लो द्विरस्त्रत्तयः धातोरातो लोपो ङिति ... ङिति हेरे २

६६

३ तिनषे धोन ५२

ओहाक् त्यागे । ओहाङ् गतौ । अनयोस्तुल्यं रूपं भवति अनुबंधनिर्देशात् आत्मनेपदं न यङ्लुकि भर्जां लुकि इति न भवति अनु
बंधनिर्देशात् अतिशयेन जहाति जहते वा भी । हाको ॥ इ इति इत्वं न भवत्यनुबंधनिर्देशात् जाहीतः जाहीयात् जहाति यादा
दा वा लोपस्योतो लोपो भवति इति निर्देशात् दादेति इत्वं दादेरे इत्येकवचनं भवति अनुबंधनिर्देशात् जाहायात् ॥ २ ॥

नि न यङ्लुकि ॥ २ ॥ अजाहेत् । अजाहात् । अजाहीतां । अजाहुः । जाहायात् । जा
हेता । जाहिता । अजाहासीत् । अजाहासिष्टां । दादेति । ददाति । दात्तः । देहि । दा
देयात् । अदादात् । एवं धेट् । दधाति । दाद्धः । दाधति । धेहि । दाधेयात् । अदा
धासीत् । अदाधात् । अदाधत । धान् । दाधाति । धात्तः । पिवन्तु । दादाति । दादे
ति । दादीतः । दादीहि । दादायात् । अदादासीत् । एवं दाप् लवने । सास्वपीति । सा
स्वप्ति । सास्वप्तः । सोस्वपति । असास्वीपीत् । असास्वप् । असास्वन् । सासुप्यात् ।
असास्वपीत् । असास्वापीत् । कॄ । चाकरीति । चाकर्त्ति । तातरीति । तातर्त्ति । ता
तीर्त्तः । तातिरति । तातीर्हि । तातराणि । अतातरीत् । अतातः । अतातीर्त्तां । अता
तरुः । अतातरी । अतातारीत् । अतातारिष्टां । ऋतश्च यङ्लुकि द्वित्वे पूर्वस्य यङ्
लुगुणः ॥ रिग्रीकोलुक् पूर्वस्यासवर्णो स्वरे इय् । अरर्त्ति । अरियर्त्ति । अररीति ॥
अरियरीति । अर्ऋतः । अरियतः । हकोरलो ईति रलोपः । आरति । आरिय्रति

पा३
इत्थं हा वित्ति रूपत्रयं
न भवति लिपा निर्दे
शात् । शाछासाह्वा
धे टा भिति वा लिर्जे
पः अदाधात् अद्भ
धे टो भूतमात्रे द्विवा
द्वि वरो ङौ वेत्ति वाऽः
अदाधत ॥ ४ ॥
दाप्लवने अदादिः दै
प् शोधने भ्वादिः अ
नयोः दाद्धित्वं नास्ति
॥ ५ ॥ अतिशयेन स्व
पिति स्वपि स्यमि व्ये
ञां यङीति संप्रसार
णं भवति यङो लुका
लुका लुप्तत्वात् त
दादेश्च तुर्णी हृता
देरिति इङ् न भव
ति गुणनिर्देशात्वा
त ॥ ६ ॥

अतिशयेन ददाति द
देति आलोपः दत्तः
दादति हे दा हा वित्ते
त्व पूर्वलोपो दीह दा
देरनिद्वत्वं दादेरे इ
त्येकं वचनं भवति ॥ २ ॥
ऋ गृ रिग्रीको न भव
ति परत्वात् ऋ विक्षे
पे तुदादिः तृ प्लवन
तरणयोः भ्वादिः व
ङ् वत् कृ गता वदा
दिः जुहोत्यादिश्चके
चित्तु यङीति पूर्वस्य
स्य गुणमाहुः रिग्री
को लुक्त्व रूपं भवति
॥ ७ ॥ चाकीर्त्तः चाकि
रति चाकीर्हि ५

परत्वात् असवर्णो स्वरे
इतीय् रूरमितिः अ
रियति ॥ २ ॥

ति। जाजर्त्ति। जाजर्त्तः। तात्वरीति। तातर्त्तः। सेस्विवीति। सेस्योति। मामोति। मामुवीति।
मामूतः। मामवति। मामोषि। मामवीमि। मामोमि। मामावः। मामूमः। मामोतु। मामू-
तात्। मामूहि। मामवानि। अमामवीत्। अमामोत्। अमामोः। अमामवीः। अमाम-
वं। अमामाव। अमामूम। तुर्वीधुर्वीदुर्वीधुर्वीहिंसायां। तोतूर्वीति। रेफात्
छ्वोर्लोपः क्वौ झलादौ च मादौ हे च प्रत्यये। तोतोर्त्ति। तोतूर्त्तः। तोतुर्वीति। तोधोर्त्ति।
तोधूर्वीति। दोदोर्त्ति। दोधोर्त्ति। मुर्छामोहसमुच्छ्राययोः। मोमोर्त्ति। मोमूर्छीति। मो-
मूर्त्तः। मोमूर्छति॥ इति यङ्लुगन्तप्रक्रिया॥ ॥नाम्नो यईच्चास्य॥ नाम्न इच्छाया-
मर्थे यप्रत्ययोऽवर्णस्य चईकारः। आत्मनः पुत्रमिच्छति पुत्रीयति। क्वचित्स्वरव्य-
कारः। गामिच्छति। गव्यति। गव्यांचकार। नाव्यति। त्वद्यति। त्वदांचकार। त्वामिच्छति
त्वन्मदेकत्वेऽइति त्वद्‌पतदस्य लोपः। अनपि चेति यलोपः। युवांयुष्मान्वेच्छति॥
मद्यति। युष्मद्यति। अस्मद्यति। काम्यश्च। पुत्रकाम्यति। पुत्रकाम्यांचकार। पश

नान्तर्ति १ ... वस्योरेकदेशस्य ... (interlinear glosses)

केवलयकारस्यार्थवान् मकार निशिष्ट अनर्थकः अतः अनर्थकत्वात् अनपि चहसात् अनेन सूत्रे ण न मकारलोपः १ टिप्पनी ...

जाजर्त्ति
जाजर्त्तिः जाजूर्मः १
जाजर्व्वीत् जाजर्हि
अजाजर्वीत् अजाजः
अजाजर्वी अजाज-
र्वः १

छ्वोरिति वलोपे उप-
धायाः इति गुणः ५

रेफात् छ्वोरिति छलो-
पः ततो गुणः ७२

गव्यांचकारेत्यादौ
अनपि च हसात् इ-
त्यनेन यलोपो न भव-
ति संनिपात परिभा-
षया॥ ७९ नाव्यांच-
कार ३

योपमाश्रित्योत्पद्यते
सतं प्रतिसंनिपातः
संनिपातपरिभाषेति
यकारेपरे वान्ता-
देशविधानानुवका-
रोयलोपस्य निमित्तं
भवतीति भावः ३

सेस्त्ते: सेस्विवति १
अवरस्तगादौ अव-
तीति आतीति औति
औतः आवति आव्या-
त् औहि आवीत् औत्
औतां आवुः आवांच-
कार आव्यात् आवि-
ताआवीत्

अ· पु· तुर्वीति ४

समुच्छ्राये वृद्धिरोद्
त्यर्थ ६

पुत्रीयेत् पुत्रीयत् अपुत्री-
यत् ... पुत्रीयांचकार पु-
त्रीयात् पुत्रीयिता पुत्रीयि-
ष्यति अपुत्रीयिष्यत् अपुत्री-
यीत् ४

नाम्न इच्छायामर्थे आ-
त्मनः पुत्रमिच्छति पुत्र-
काम्यांचकारेत्यादौ अ-
नपि चेति यलोपो न
अर्थवद्ग्रहणे नानर्थ-
कस्य ग्रहणमिति उक्त-
त्वात्॥ २॥ ...

॥ धनेमतिपुनईनमिछति तत्र इत्याभावः पक्षे दरिद्रः सन् धनमिछति तत्रैत ॥१॥ धनायो चकारः धनीयो चकार २

एवं उदकं पातुमि
छति तत्र उदन्यप्रश्न
कालांतरे उदकं
पातुमिछति तत्रेन
तस्य २
सि॰ चं॰ नु॰
पक्षादि प्रसालनार्थम् २

गर्गशब्दात् यञ्जगार्ग्य
ङिष्प्रत्यय आदिवृद्धि
यस्यलोपः अकारस्य
कारः ५
अश्लोपस्यस्थानव
त्वात् लोपधाया गुणः
६

अश्वं मैथुनार्थमि
छति एवं वृषं ८
लोलसया दधीछ
ति लोलसयामधि
छति ॥ ३

नमः करोति तप
करोति । वरि...
रोति शुश्रूषते ॥ १

स्वकाम्यति । सर्पिष्काम्यति ॥ धनस्य नैकारो गार्द्ध्ये ॥ धनायति । अन्यत्र धनीयति ॥ उद
कस्योदन् पिपासायां ॥ उदन्यति । अन्यत्रोदकीयति ॥ डिवप्रत्ययस्योकारस्यधौ १
र्विहसे इत्यादिना दीर्घो न भवति ॥ दिव्यति । दिवमिच्छति । दिव्यति । अमुमिच्छति
अदस्यति ॥ स्त्वोरिः ॥ कर्त्रीयति । हसात्तद्धितयस्य लोपो वे [illegible]
[illegible] चौ च ॥ गार्गीयति । वाच्यति । कवीयति । समिध्यति । हसाद्यस्य लोपो वा
न पि ॥ समिधिता । समिध्यता । मां ताभ्यां त्वां योन । किमिच्छति । इदमिच्छति । स्वरि
छति ॥ अश्ववृषयोर्मैथुनेच्छायां ॥ क्षीरलवणयोर्लालसायां ॥ अश्व
स्यति । वडवा । वृषस्यति । गौः । क्षीरस्यति । बालः । लवणस्यसुट् ॥ नाम्नो येला
लसायां सुगसुकौ ॥ दधिस्यति । दध्यस्यति । मधुस्यति । मध्वस्यति । यशस्काम्य
ति । सर्पिष्काम्यति । मां ताभ्यां काम्यः ॥ किंकाम्यति । स्वःकाम्यति । करणौ
चं ॥ नाम्नः करणेर्थे यः ॥ नमस्यति । तपस्यति । वरिवस्यति ॥ शब्दादिभ्यो पङ् ॥ श १

शब्दं शब्दायते इत्यर्थः २

गार्गी इति ॥ पूर्यति २
तिरमिछति । पुरमि
छति दिव्यं दिवइति
स्त्वतेत्रः शब्दानतुकि
वंतस्य दिवः तस्य तु
किपिचः तेन नदी
र्घः ॥ ५ ॥

इत्कटेछा लालसा
तया लालसया क्षी
रं च लवणं चेछ
तीति ॥ ७ ॥ तस्मात
रेको लालसा ५

७६
शब्दादिभ्यः कर्म
ण्यो बङ् करोत्यर्थे २

॥शब्दं करोति। एवं वैरं कलहं। अभ्रं मेघं। कष्टं गुर्वादिरिष्ठेमेयस्सु गणादिष्वन्त्यलोपश्चेति स्थो आदेशः लुङि अतुस्थवत् दूरं
करोति लुङि अदूदवत् इष्ठेयथा गुर्वादिराद्यादेश अन्त्यलोपो विन्मतुवल्लोपः पुंवद्भावो नाम्नो णावपि स्थूल दू
रयवह्रस्व। क्षिप्र क्षुद्राणां क्षेपो ह्रसः क्षिप् क्षुद् आदेशाः प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणां
प्रस्थस्फवरबंहिगर्वर्षित्रप्द्राघिवृन्दाः प्रशस्यान्तिकबाढानां श्र कन्नेद साधाः आदेशाः इष्ठेयसोः परतः ४

शब्दायते। वैरायते। कलहायते। अभ्रायते। मेघायते। कष्टायते॥ ऊष्मबाष्पधूमेभ्य उद्वमने॥ ऊष्मायते। बाष्पायते। धूमायते॥ णिङ् इत्करणे॥ नाम्नो णिः प्रत्ययः करणेऽर्थे स च ङित्॥ घटं करोति। घटयति॥ अग्लोपिनो नाङ्कार्यं॥ अजघटत्। महान्तं करोति। महयति। अजीमहत्। कनयति। अल्पयति॥ णौ विष्ठवत्कार्यं॥ स्थूलं करोति। स्थवयति। दवयति। ह्रसयति। क्षेपयति। क्षोदयति। प्रियं करोति। प्रापयति। अपिप्रपत्। गुरुं करोति। गरयति। अजीगरत्। स्थिरं करोति। स्थापयति। अतिस्थपत्। ऊढिं करोति। ऊढयति॥ नेरङ्स्वरादेः परः॥ अङि पूर्वस्य ढस्य जो वा॥ औजिढत्। औडिढत्। ऊढं करोति। ऊढयति। औजढत्। औडढत्॥ कर्तुर्यङ् नाम्नः॥ उपमानात्कर्तुराचारेऽर्थे यङ्॥ श्येन इवाचरति। श्येनायते काकः। पण्डितायते मूर्खः॥ यङि वा सलोपः॥ पयायते। पयस्यते॥ अप्सरस् ओजस् सुमनसां नित्यं॥ अप्सरायते। ओजायते। सुमनायते॥ नाम्न आचारे क्विप् वा॥ कृष्ण इवाच

एष्मः कर्मणोपङ् २॥ ऊष्माणमुद्वमति नाम्न इति नलोपः ये इति दीर्घः धूममुद्वमति। बाष्प[illegible] २॥ ह्रस्वं करोति लुङि अजह्रसत् क्षिप्रं करोति अचिक्षिपत् क्षुद्रं करोति अचुक्षुदत् प्रियस्थप्रादेशे वृद्धिः ततोऽपातो ना पिति पुक् अपिप्रपत्॥ ५

बहिष्कृते कौ कृतसंज्ञकाः होढस्यार्थौ ईः इत्यनादि इष्ठकटौ णेरिङ्त्कर णे अघातः णेरङ्स्वरादेः जं औजिढत्॥ ६
उपमीयते उपमानं तस्मा चरणमाचारः॥ ७

ओजस्वीवाचरति सुमनाः इवाचरति २॥

युवानं करोति यवयति युवाल्पयोः कन्वेति अयीयवत् अचीकनत्॥ ४॥
इष्ठवत् ईयसुपरे युवत् गुर्वादिरित्यादिकार्यं तत्रोपरि नवति ईयसुरि इमनि स्थूलं करोति स्थवयति स्थद यति द्रढयति ४

वहनम् ऊढिस्तां लुङि इलोपे कृते णिनिमि त्तः स्वरादेः शेषः द्वित्वे इति ढस्य द्वित्वं॥ ८॥

श्येनीवाचरति यङ् मानिनोऽपि इति पुंवत्ये इति दीर्घः॥ ३॥

आम्नो वोर्णी दीदीति पूर्वस्यात्लो आतो लुप्डाविति डौ।२।

सि०चं०नु०

रति। ऋस्मति। अइवाचरति। अरति। अरतः। अरंति। रत्। रतौ। रयुः। आरात्। आरातौ। आरा
न्। लिटि। आरौ आरतुः॥ उः॥ आदंताद्विषोः नस्यालोपः। यात्। यात्तौ। इता। इष्यति। आ
सीत्। यमिरमीति। मालेवाचरति। मालाति। मालांचकार। अमालासीत्। कवि
रिवाचरति। कवयति। कवीयात्॥ नामधातोर्ह्रद्विर्वासौ। अकवयीत्। अक
वायीत्॥ विरिवाचरति। वयति। विवाय। विव्यतुः। अवयीत्। अवायीत्। श्रीरि
व श्रयति॥ शिश्राय। शिश्रियतुः। पितेवाचरति। पितरति। पितरांचकार। ऋतो रिङ्। पि
त्रियात्। पितरिता। भूरिवाभवति। बुभाव। अभावीत्। द्रुरिवाद्रवति। अद्रावीत्
णमांतस्योपधायादीर्घः कौमसादौहे च क्ङिति। इदमिवाचरति। इदामति। रा
जेव राजानति। येनां तमेव पदं नान्यत्। राजायते। पंथा इव। पथीनति। मंथा इव
मथीनति॥ ऋभुक्षा इव। ऋभुक्षीणति। द्यौरिवाचरति। द्यवति। दुद्याव। द्योयात्
द्यविता। क इवाचरति। कति॥ चकौ चके सन्ये॥ क्यात्। किता। अकीत्। स्व इ

आशिषि यादादौ दीर्घ इति रिङ्।७। अभि स्वरूप... इति... ल्की... शास्त्रे... धातु... दीर्घः... दौ... दीर्घः तथो... धातोर्नामिनः... वृद्धिः साधवमर्थ तु लुप् वृद्धिवाधि त्वात इत्यलोपः चकौ।।२।।

द्वादेः पेरिति भुवः सिलोपे इति भुकच न भवति धातुपाठ स्यस्येव तत्र ग्रहण त।७। श्रिभ्रुद्रुभ्यो उ इति न भवति धातु पाठस्याभावात्।७

आचरणमाचारस्त
स्मिन् उपमीयते ने
न तुपमानं तस्मात्

स्व । स्वति । सखो । सख ॥ आचारे उपमानात् ॥ कर्म्माधारयोरुपमानात्यः प्रत्यय॰
आचारेर्थे । स्य चैकारः । पुत्रमिवाचरति । पुत्रीयति । शिष्यमुपाध्यायः । प्रासादीय
ति कुट्यां भिक्षुः ॥ भृशादिभ्यो भूतद्भावे यङ् ॥ अप्रेत्यहसलोपश्च ॥ अभृशो भृशो
भवति । भृशायते ॥ अशब्दस्याच्च द्भवति । शब्दायते ॥ क्विबपि । शब्दतति । भृशा
ति ॥ क्विरपि ॥ अभृशो भृशो भवति । अश्यभूत । भृश्यभूतां । सुमनायते । अनुन्मना
उन्मना भवति । उन्मनायते । भृशी भवति ॥ उपसर्गसमाकारं पूर्वपदं धातुसंज्ञा हे
तौ प्रत्यये ॥ चिकीर्षिते । प्रत्यक्रियते ॥ तेन मनसशब्दात् प्रागट् ॥ कर्तुर्यङ् ॥ स्वम॰
नायत । स्वमनायिष्ट । उदमनायत । स्वमनायत ॥ सुखादिभ्यो यङ् ॥ कर्त्तुरनुभवे सु
खं वेदयते । सुखायते । दुःखायते ॥ पुच्छादुदसने व्यसने पर्यसने च णिङ् ॥ पुच्छमुदस्य
ति । उत्पुच्छयते । उदपुपुच्छत । विपुच्छयते । परिपुच्छयते । भाण्डात्समाचयने । संभाण्ड
यते ॥ चीवरादर्जने परिधाने च ॥ संचीवरयते भिक्षुः । परिचीवरयते । अर्थवे

क्षौ द्युतिरर्थः वेति
लोपः क्षौ दीर्घः ई
श्चास्यतीलं ॥५॥

स्वगतं सुखमनुभव
तीत्यर्थः ३

प्रासादे इवाचरति

कारयोः

भाण्डानि समाचिनोति
राशीकरोति लुङि स
मचभाण्डत ॥२॥
सं चीवराणि अर्जय
ति परिधत्ते वा लुङि
समचिचीवरत ॥३॥

कुमारीवाचरति कुमारायते हरिणायते गुर्व्यते मद्व्यते सपत्नीव सपत्नायते युवतिरिव युवायते पट्वीव पट्वयते न कोपधस्य पुंवत् पाचिकेव पाचिकायते पृथुमाचष्टे २ गर्व्वीवाचरतीति

दसत्यानामापुकृत्मौ। अर्थापयति। आर्त्तीयपत्। वेदापयति। अविवेदयत्। सत्यापयति। एनीमाचष्टे। एतायते। एतयति। पृथुं प्रथयति। वृद्धौ सत्यां पूर्व्वकादि टिलोपः। पिप्रथत्। अपप्रथत्। मृदुं म्रदयति। अमिम्रदत्। अमम्रदत्। भ्रशयति। क्रशयति। द्रढयति। अवभ्रशत्। अचक्रशत्। अदद्रढत्। परिवृढयति। पर्यववृढत्। त्वां मां वाचष्टे। कथं विद्वान्त्वेकदेशोपि धातुशब्देन गृह्यते। त्वादयति। मादयति। युवां आवां वाचष्टे। युष्मयति। अस्मयति। युष्मान्। अस्मावयति। न टिलोपे णत्वे च कृते। श्वुनयति श्वेके। विद्वांसं। विद्वयति। विदावयतीत्यं केविदयतीत्यन्ये। उदंचं। उदीचयति। उदैचिचत्। प्रत्यंचं। प्रतीचयति। प्रत्यचिचत्। सम्यंचं। समीचयति। समचिचत्। तिर्यंचं। तिरायति। अतितिरायत्। सध्यंचं। सध्रायति। असमध्यावत्। विषड्यंचं। विषड्डापयति। देवड्यंचं। देवड्डापयति। स्थूलं। स्थवयति। दवयति। युवानं। यवयति। कनयति। अंतिकं। नेदयति। बाढं। साधयति। असमाधत्। अनिनिदत्। अनिनेद

युवाल्पयोः कन्वा २ गुर्वादिरंतिकस्य नेदः टेर्लोपश्च यतइत्यलोपः ॥२॥

त: शुन त्वाचीत् येनिपातनात् एनीति ॥२॥ पृथुं करोतित्यथयति ॠ ई म निशति

सि॰ कौ॰ उ॰

भाव: ॥२॥ टेरन्तर २ १८

विद्वत्सपाद्व स्पविदा दिरा: ६

आदिष्टवृद्धावान्त्य नोवस्यनवीच दीर्घ: दयुत्वं टिलोपे कृते प्रापयति अशुश्रावत् ॥६॥ नित्य त्वात् संगुत्वं नतष्टि लोपे विदयति टि लोपे वसोर्वनुत्वसुत्वे च कृते टेः विदावयति ॥५॥ तिरश्रादयस्त्वेतीति लुङि ईकारस्त्रे अ टो चिच्छष्टस्य हि लोपे लोपः तृदृद्र्य तादि टिलोपे नाचेर पहार वृद्धिः सध्राव यतितृ

नौ एकस्वरस्य च टिलोप: अतित्वरत् अमीमृदत् युवामावामाच छे युवयति आयुयवत् आवयति आवीवयत् ५

अत्र टिलोपिनो नाड्कार्यं निषिधात् २

परिवृढयति पर्यव वृढत् ॥६॥

अचेदीर्घश्चे सनेत्या लोपपूर्व्वदीर्घोप्रितिव यति लुङि चिणान्त्यारद्रप्रत्यचिचत् घ तामसेवर्णस्वरे इति प्रकृतिभावे प्रतिअ चिचत् ॥७॥ सम्यंचमाचष्टे संचेर तिसमीचत् लुङि प्रकृतिभावे समिअचिचत् ८ तिर्यंचमाचष्टे अचिटिलोपे नासिद्ध त्वात् तिरसः तिरः ब्रू विः १८ तिरायति उपसर्गसमाकारान्ता तिरसः एकवर्ण करोनवनतिष्ठे

दीर्घस्य द्राघिः अद
द्राघत् अववृंदत्॥

॥स्रग्विणीं स्रजं जयतीति संज्ञापूर्वकत्वान्न वृद्धिः श्रीमती श्रीमन्तं वा श्रापयति अशिश्रियत् पयस्विनी पयस्यति इष्टादिलोपो न तद्व
द्भावात्स्य लुकः परत्वात् भुवं भावयति अबिभवत् अङ्ग्यतोरिति पूर्वस्येत् भुवं अबुभुवत् श्रियं अशिश्रियत् गां अजूगवत् रैं
अरीरयत् नावं अनूनवत् स्वः स्वयति असस्वत् अहोन् अहोर्भिर्भावयति॥३॥

वर्षमाचष्टे ... प्रचष्टे

त्। असीसधत्। वृद्धः। ज्यापयति। अजिज्यपत्। वर्षयति। प्रियं प्रापयति। स्थिरं स्था
पयति। स्फिरं स्फापयति। उरुं वरयति। बहुलं बंहयति। अबबंहत्। गुरुं गरयति।

उरुशब्दस्य वरादेशः २

तृप्रं त्रपयति। अतित्रपत्। दीर्घं द्राघयति। वृंदारकं वृंदयति। दीर्घस्य द्राघिः। अ
दद्राघत्। अववृंदत्॥ इति नामधातुप्रक्रिया॥ ॥कंड्वादिभ्यो धातुभ्यो यक् स्वा
र्थे। कंडूञ् गात्रविघर्षणे। कंडूयति। अकंडूयीत्॥ मंतु अपराधे रोषे च॥ मंतूयति

कंडूयतेः

मिन्तूयत इत्येके॥ मंतूयते॥ वल्गु पूजामाधुर्ययोः॥ वल्गूयति॥ असु अस असूञ् च उप
तापे॥ असूयति। असूयांचकार॥ असूयति असूयते॥ लेला दीप्तौ॥ लेलायति॥ मेधा आ
शुग्रहणे॥ मेधायति॥ सुखदुःख तत्क्रियायां॥ सुखयति। दुःखयति॥ सपर पूजायां॥ सप
र्यति॥ भिषज् चिकित्सायां॥ भिषज्यति॥ इषुध शरधारणे॥ इषुध्यति॥ गद्गद् वाचः
स्खलने॥ गद्गद्यति॥ एला केला खेला विलासे॥ एलायति। खेलायति॥ हृणीङ् रोषणे ल
ज्जायां च॥ हृणीयते॥ महीङ् पूजायां॥ महीयते॥ अगद नीरोगत्वे॥ अगदयति अग
लिट् अस्य कृत्स्नयोः लिट्यति चरण वरण गतौ तरस उपतापे चुरण चौर्ये तुरण त्वरायां भुरण धारणपोषणयोः ला द्जीवने

धातुभ्यः किं प्रातिप
दिकेभ्यो मा भूत् द्वि
धाहि कंड्वादयः धा
तवः प्रातिपदिका
नि च॥ धातवो ना
मानि च तत्र धातुभ्यो
नित्यं यक् नाम्नो तु
कंडु करोतीति वि
ग्रहः॥
सुखं चानुभवति दुः
खं चानुभवति॥

॥ गतं प्रकारसादृश्यं तस्य तस्य ताच्छील्यं तस्य भावः ताच्छील्यं तस्मिन्नर्थे आत् मातृकं गावः अनुहरंते पितृमातुश्च सादृश्यं स
तत्र परिशीलयंति गतताच्छील्ये किं मातुरनुहरति सादृश्यं ॥७॥ अस्य सादृश्यमात्रं विवक्षितं न तु प्रकारताच्छील्यं २

सि०चं०३०

९९

दीत॥ इति कृञादयः॥ ॥ नेर्विशः॥ न्यादिपूर्वकाद्विशादेह्रीतोरात्॥ निविशते
परिव्यवेभ्यः क्रियः॥ परिक्रीणीते। पर्यक्रेष्ट। विपराभ्यां जेः॥ विजयते। व्यजेष्ट। आ
ङो दोनास्यविहरणे॥ विद्यां आदत्ते। आदित। विकाशने तु व्याददाति मुखं
पराङ्गकर्मकान्नवेव्यादत्ते पिपीलिकाः पतंगस्य मुखं। क्रीडः अनुसंपरि
भ्यः॥ आक्रीडते। अनुक्रीडते॥ समः कूजने॥ संक्रीडते। परिक्रीडते॥ कूजने तु सं
क्रीडति रथचक्रं॥ आगमेः क्षमायां॥ आगमयस्व तावत॥ शिक्षेर्जिज्ञासायां॥ धनु
षि शिक्षते॥ हरतेर्गतताच्छील्ये॥ पैतृकमश्वा अनुहरंते॥ मातृकं गावः॥ किरते
र्हर्षजीविकाकुलायकरणेषु॥ अपाच्चतुष्पाच्छकुनिष्वालेखने॥ अपस्किर
ते॥ वृषो हृष्टः॥ कुक्कुटो भक्ष्यार्थी श्वा आश्रयार्थी च। हर्षादिष्विति किं। अपकिर
ति कुसुमं वायुः॥ आङि नुप्रच्छ्योः॥ आनुते। आपृच्छते। शपथ उपालंभने॥ विप्राय शा
पते। समवप्रविभ्यः स्थः॥ संतिष्ठते॥ अपिहाधास्याभित्सेङि त्वमाति नंतु दीङ॥

गजोपकिरति जलं अत्र हर्षे सत्यप्यालेखनाभावान्न सुटोऽप्राप्तिः २ उपालंभो नाम वाचा शरीरस्पर्शनम् २

निविशेयः ४
तृतीयार्थस्यानो र्वा
त्र अन्यत्र आत्मनेपद
तु क्रीडति तेन सह
तदर्थः ॥५॥
तेनातस्तेन तत्र
तिनातु शिक्षाजिज्ञा
सातस्यार्थे अनुविधा
येत्राने धनुषि...
शिक्षति ॥७॥
...हर्षादिषु...
...तस्य कारणं इत्यर्थ
...॥९॥ हर्षेण...
विलिखती...
उत्कंठा...
तिर

विशप्रवेशने। दुक्रीञ्
द्रव्यविनिमये। जिजये। डुदा
ञ् दाने। क्रिड विहारे।
गम्लृ गतौ। शिक्ष विद्यो...
हृञ् हरणे। ...
...
नितेर

...
...
...

...
तुष्पी ...
...
...
प्रकाशयति २

॥ आहत आहसातां लुङ्यात्मने हते वीबधः हनो लुङ् लिङोरित्यनेन॥५॥
सिं चौ नं दादिस्सौम्य सृच्छते गृह्णाति नत्तु स्येति॥२॥

॥ ई पर्यन्तस्य रूपोऽस्तीति पूर्वस्येत्वं असवर्णे स्वरे इति इयुः समियृते लुङि सर्त्तिशास्तीति अङ् ऋदृशोऽङि गुणः सेट् इट् अङभावः स्वादिजुहोत्यादिकयोर्ग्रहणं तत्र स्वादिः समृच्छते लिट् समाहारे समाराते समारिरे लिङि ऋत इति गुणः समर्षीष्ट समर्तीष्ट हनतः स्यपरतीट् समरिष्यते समारिष्यत लुङि सेट् इट् अङभावः उरिति गुणः लोपो व्यवादिति सिलोपः मासमर्त मासमर्षातां मासमर्षत माङ्योगे समार्त समार्षातां समार्षत मासमरत मासमरेतां मासमरन्त माङ्योगे समारत समारेतां समारन्त॥३॥

आवधिष्ट। आहत। आवधिषातां। आहसातां। यमः सूचने सिचः कित्। उदायत॥ समो गम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिदृशिभ्योऽकर्मकेभ्यः॥ संगच्छते। गमः सिचो कितौ वा॥ संगसीष्ट। समगत। समगंस्त। संपृच्छते। संस्वरते। समृच्छते। समियृते। संशृणुते। संविते। संविदाते। वेत्तेरंतो वा रुडागम। संविद्रते। संविदते। संपश्यते। उपसर्गादस्यत्यूह्योर्वा॥ निरस्यति। निरस्यते। समूहति। समूहते। समूहां चकार। समौहीत॥ निसमुपविभ्यो ह्वः॥ निह्वयते॥ स्पर्द्धायामाङः॥ कृष्णश्चाणूरमाह्वयते॥ प्रवृत्तिवंधोत्साहस्फीततासु क्रमः॥ ऋचि क्रमते बुद्धिः। अध्ययनाय क्रमते। क्रमंतेऽस्मिन् शास्त्राणि। उपपराभ्यां। उपक्रमते। पराक्रमते। आङ उद्गमने॥ आक्रमते सूर्यः। वेः पादविहरणे॥ साधु विक्रमते वाजी। प्रोपाभ्यां समर्थाभ्यां॥ प्रक्रमते। उपक्रमते। अनुपसर्गाद्वा॥ क्रामति। क्रमते। अपह्नवे ज्ञः॥ शतमपजानीते॥ अकर्मकाच्च॥ सर्पिषो जानीते॥ संप्रतिभ्यामनाध्याने॥ शतं संजानीते॥

ज्योतिर्ग्रहनगारि ४
ज्योतिस्समक्रमं तेकिम् आक्रमन्निर्धूमो हर्म्यतलात् ३८
पारं जातीयोपाकिंस्प्र क्रमति गच्छतीत्यर्थः
सर्पिषानुपायेन प्रवर्तते २

पुष्पतमस्यर्थः २
क्रमादि २
उपसर्गादूहते ह्रस्वो वारो किति ब्रुलस मुत्थान अन्तिसमुह्य॥५॥
स्फीतासिनवद्धिः
अध्ययनादीनां गतिविशेषो विकसतामुच्यते इत्यर्थः ३
पादविहरणे किम् विक्रामति संधिः द्विधाम वनिस्फुटतीत्यर्थः ३

वदमकार्यां। उद्गिरते। चरतातिस्त्रकलायो। दाण् दाने। यमनयरमे। उकृञ्करणे। अनुसर्गात् किम् स्वर्गलोकं न प्रजानाति १

सम्प्रर्वी गिरतेः प्रतिज्ञाने वर्तमानात्मनेपदं ६ रहस्युपलोम पतीसूर्य्यः ३ मानुर्वी २ उत्पूर्वाच्चरतेः सकर्मकादात्मनेपदं भवति ६

शतं प्रतिजानीते॥ अनाध्याने इति किं॥ मातरं संजानाति॥ अनुपसर्गाज्ज्ञः॥ गां जानीते॥
भासनोपसंभाषाज्ञानयत्नविमत्युपमंत्रणेषु वदः॥ शास्त्रे वदते॥ भृत्यानु
पवदते॥ क्षेत्रे वदते॥ गेहे विवदंते॥ उपवदते॥ मनुष्यादीनां सम्भूयोच्चारणे
॥ संप्रवदंते ब्राह्मणाः॥ व्यक्तवाग्विषयादनुपूर्वादकर्मकात्॥ अनु वदते
कठः कलापस्य॥ वा विप्रलापे॥ विप्रवदंति॥ विप्रवदंते वा वैद्याः॥ अवा
द्गिरते॥ अवगिरते॥ समः प्रतिज्ञाने॥ शब्दं नित्यं संगिरते॥ उदश्चरः सकर्मकात्॥ ध
र्ममुच्चरते॥ समस्तृतीयायुक्तात्॥ रथेन संचरते॥ दाणश्च सा चेच्चतुर्थ्यर्थे॥ दास्या
संयच्छते॥ उपाद्यमः स्वीकारे॥ भार्यामुपयच्छते॥ य॥ सिकिद्धा विवाहे॥ रामः सी
तामुपयात॥ उपायंस्त वा॥ वेः शब्दकर्मणः कृञः॥ शब्दं विकुरुते॥ अकर्मकाच्च
विपूर्वकादकर्मकात् कृञः प्रात्॥ ओदनस्य पूर्णाश्छात्रा विकुर्वते॥ विकुर्वते
सैंधवाः॥ विवादं कुर्वंति॥ चेतन्यं तर्भावित॥ अर्थस्तु सकर्मकः॥ विकुर्वते॥

उत्कं तार्स्वरम॥ मभ्यानं तद्भिन्न मध्यानं

मिलित्वोच्चारयन्तीत्यर्थः ४
व्यक्तिः सम्पूर्णवनुध्यतेः
३ शास्त्रे वदते ३
क्षेत्री विवदके मुख्यात्
वः करोति ३ विविधं ना
वदंते विमतिं कुर्वति ३
नेह संप्रवदंति खगाः
४
अकर्मकात्किं उक्त
मनुवदति ५ उक्तवाचा
किं अनुवदति वीणा ५
उत्स्थत्ता गच्छति ७
स्वीकारे विवाहः स्वी
कारमात्रे
शब्दकर्मकात्कर्मणःस्य
सकर्मकात्किम् ३
वीणास्वरं चरति ३ उप
दिश्च कृ तृतीयस्यार्थः
५

सम्यग्विचार्य वद
तीत्यर्थः २

उपमंत्रणमुपच्छं
न्दनम् २

सहोच्चारणे ३ वदेरात्मं
विमति पूर्वकं विवि
त्रेमायन्त इत्यर्थः ३
अनुतरत्रसादृश्ये ४
युगपत्परस्परं विस
द्धं वदंतीत्यर्थः ५
प्रतिज्ञाने किं संगिरति ग्रा
सं कुत्स्यमानस्तीत्यर्थः ५
तृतीयायां वदकृः दा
त्मनेपदं स्यात् चे
च्छति सा तृतीया ५
अशिष्ट व्यवहारे चतुर्थ्य
र्थे तृतीया तृतीया ५
शब्दकर्मणः किम्
ते विकरोति कोमः ३
संपूर्वो गृ तस्तृतीया
ते। नोपपदे न युक्त
तृतीयास्या च चे
तुर्थ्यर्थे ५

समुदाङ्भ्यो यमोऽग्रंथे व्रीहीन् संयच्छते भारमुद्यच्छति उद्यच्छते वस्त्रमायच्छते ग्रंथे किम् उद्यच्छति वेदम् अधिगन्तुमुद्यमं करोतीत्यर्थः १

सं० चं० नं०

५२

सैंधवान्॥ कर्मणः कर्तृत्वविवक्षायां। विकुर्वते सैंधवाः॥ ज्ञाश्रुस्मृदृशां सनः॥ जिज्ञासते। सुश्रूषते। सुस्मूर्षते। दिदृक्षते॥ नानोर्ज्ञः॥ अनुजिज्ञासति पुत्रं। प्रत्याङ्भ्यां श्रुवः॥ प्रतिशुश्रूषति। स्वराद्यंतोपसर्गादिति वक्तव्यं। प्रयुंक्ते। उपयुंक्ते। उद्युंक्ते॥ अपपन्ने किं। पात्राणि प्रयुनक्ति। समः क्ष्णुवः। संक्ष्णुते शस्त्रं। भुजोऽनवने॥ ओदनं भुंक्ते। अनवने किं। भुवं भुनक्ति॥ गृधिवंचिभ्यां प्रतारणे। माणवकं वंचयते। गर्द्धयते। गर्द्धयसे। अप... दः॥ ...पमंपदते। कर्तरि कर्मव्यतिहारे धातोः॥ व्यतिभवते। व्यतिभाते॥ गतिहिंसार्थपठजल्पहसात् इतरेतरान्योन्यपरस्परोपपदाच्च न। व्यतिगच्छंति। व्यतिघ्नंति। व्यतिपठंति। व्यतिजल्पंति। व्यतिहसंति। इतरेतरं। अन्योन्यं परस्परं व्यतिलुनंति। अनुपराभ्यां कृञः पं॥ अनुकरोति॥ अभिप्रत्यतिभ्यः क्षिपः॥ अभिक्षिपति। प्राद्वहः॥ प्रवहति। परेर्मृषश्च॥ परिमृषति। परिवहति॥ इति परस्मैपदव्यवस्था॥ पकुच

व्यतिलुनीते अन्यस्य योग्यं लवनं करोतीत्यर्थः। व्यतिस्ते व्यतिषाते व्यतिषते ... इरेकारसंबंधिनः ... व्यतिहरे इति योगविभाग ... वहेरपीति केचित् ... बोधयति पद्मम् ... बोधयतिका ... अध्यापयति ... इत्यर्थः

५२

तत्र ये कर्तृमात्रे व्यापारमेव लक्षंते ते ऽकर्मकाः ये पुनः कर्तृकर्मोभयगतं व्यापारमाचक्षते ते सकर्मकाः पच्याद्यः न दुक्ते विक्लेदा
द्योदनादिस्थं कर्तृस्थं अपरागादिकमुभयोः सकर्मकाः अकर्मकाः व्यापारं कर्तृगं परं २ ॥ अकर्मकेभ्यः कर्मणि न भवति अस्य संभवात्
तत्र योगे कर्मणः तथा सकर्मकेभ्योपि भावे प्रत्ययो वा गुरुर्वदत्ते नेत्यादौ न भवतीति माधवः २८

नुभूं ॥ धातोर्भावे कर्मणि च यक् प्रत्ययः स्तिवादिषु चतुर्षु परतः ॥ आर्द्धधातुके कर्
मणि ॥ अकर्मकाद्भावे सकर्मकाच्च कर्मण्याद्भवति ॥ भावस्यैकत्वादेकव
चनं नामाद्यविषयत्वेपि प्रथमातिक्रमे कारणाभावात्प्रथमः ॥ भूयते । भूयेत
भूयतां । अभूयत । बभूवे ॥ स्वरांतानां हनग्रहदृशां भावकर्मणोः ॥ सिसतासी
स्यपामिट्वासइण्वच्च । भाविषीष्ट । भविषीष्ट । भाविता । भाविष्यते । भविष्यते ।
अभाविष्यत । अभविष्यत ॥ इ एतन्यं कर्त्तरि ॥ धातोस्तनिपरे भावे कर्मणि च इ
ण् प्रत्ययः सेरपवादः । लुक् । इणः परस्य तनो लुक् । अभावि ॥ अकर्मकोप्युपस
र्गवशात्सकर्मकतामनुभवति । सुखमनुभूयते स्वामिना । लज्जासत्तास्थितिजागर
णं । वृद्धिक्षयभयजीवितमरणं ॥ शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मक
माहुः ॥ २ ॥ फलव्यापारयोरेकनिष्ठतायामकर्मकः ॥ धातुस्तयोर्धर्मिभेदे सकर्मक
कउदाहृतः ॥ २ ॥ धातोरर्थांतरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ॥ प्रसिद्धेरविवक्षातः कर्मणो

भावे धात्वर्थे क्रियात्मके कर्मणि क्रियाफलविशेषे यक् प्रत्यय १

कर्तृकर्मणोरगोचरत्वर्थः २८

युष्मदस्मदोरविषयत्वात् प्रथमः ३

यथा कृष्णः स्यातीत्यत्र व्यापारः स्नाने फलं लानजन्यवृद्धिस्तयोरेकनिष्ठता कर्तृनिष्ठत्वात्
एवं स्यातिसरवशुद्धतीत्यर्थः तत्र धातुरकर्मकः तयोरितितयोः फलव्यापारयोः धर्मिभेदे विधेते यस्य सः धर्मी कर्ता
तस्य भेदे भिन्नत्वे सकर्मकः यथा कृष्णो गामानयति स्पत्र गोचरं फलनिष्ठं चारला क्रिया कृष्णे
लोगो निवृत्तं तत्र सकर्मकः
सकर्मकास्तवदेहः । कर्तारे
न दीव्यहति स्यंदती सर्थः
च स्यातचे क्लेशाः छिदैः वंदे
ते तीसर्थः १

धातोरर्थद्वयं फले व्यापारश्च
धातुजन्य व्यापाराश्रयः कर्ता ।
धातुजन्य फलाश्रयं कर्म

वर्तमानात्र

यथा मेघो वर्षति जलमित्यर्थः १ गच्छति ग्राममिति
प्राप्ते ये अधिवसतीत्यादि तानर्थः संप्रत्येते
किं प्रयुः १ क्रियादिकं कर्मकं तरं

तत्र त्रैभावलिंगे लोपा दस्य
इति यक् कार्यैः धात्वर्थे
केवलः कुरु भावे इत्य
लिखीयते २

भवतेर्भूस्तस्यानुविदे

भविता ५

तिर्धे

अर्थोन्तरवृत्त्या यथा भा
रं वहति उद्यमते १८

अवलोः कर्मकर्त्ते । नदीवहतिदेवदत्तोजीवतिमेघोवर्षतिहितान्नयःसंत्ययते तेसकिंप्रभु रित्युदाहरणचतुष्टयं सकर्मकाकर्मकत्वे १ = दुःखला

सं० चं० तु०

५२.

ऽकर्मणिकाक्रिया॥ ३॥ शीङोऽयङ्येक्ङिति। शय्यते। शिश्ये। शायिषीष्ट। शयिषीष्ट।
अशायि। अयक्ङि। ऋतोरिङ्यक्ङि॥ घटः क्रियते। त्वंदुःखीक्रियसे। रोगैः। विरा
गैःसुख्यहंक्रिये। चक्रे। कारिषीष्ट। कृषीष्ट। कारिष्यते। अकारि। अकारिषातां।
अकृषातां। भाव्यते। भावयांचक्रे। भावयांबभूवे। भावयामासे। इण्वदिटिणि
लोपः। भाविता। भावयिता। भाविष्यते। भावयिष्यते। अभावि। अभाविषातां। अ
भावयिषातां। बुभूष्यते। अबुभूषि। अबुभूषिषातां। बोभूय्यते। यङ्लुगन्तात्तु
बोभूयते। स्तूयते विष्णुः। अस्तावि। अस्ताविषातां। अस्तोषातां। अर्यते। स्म
र्यते। आरिता। अर्ता। स्मारिता। स्मर्ता। इज्यते। तनादेर्वा यकि। तायते। तन्यते।
अतानि। जायते। जन्यते। तप्यते। तपोनेणकर्मकर्तरि। अनुतापेच। अन्वतप्त
पापेन। दादेः। दीयते। ददे॥ आतोयुक्। ञ्णितिच। दायिषीष्ट। दासीष्ट। अ
दायि। अदायिषातां। अदिषातां। धीयते। स्थीयते। अग्लायि। हन्यते। घानिषीष्ट

अजनि इत्यत्र तन्यकः २

च नरागः सुखसाधनं रोगः २

करिष्यते हन्तः स्पष्टतीद् ३

तनोतेः ४ आत्वं ४

जम्हेनो ... पद्यापाः

५२

अयाहि अग्राहिषातां अग्रहीषातां २८

